**संस्कृत-वार्ता:**

**दिनाङ्क : 23/11/2025**

**सायमः- 06:20**

**आदौ मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्र मोदी अद्य दक्षिण-अफ़्रिकादेशस्य जोहान्सबर्ग-नगरे जी-विंशति: शिखरसम्मेलने भाग-ग्रहणानन्तरं षष्ठे भारत-ब्राज़िल्-दक्षिण-अफ़्रिका सम्मेलने (आई. बी. एस्. ए.) इत्यत्र भागं गृहणाति।
- प्रधानमन्त्री नरेन्द्र मोदी दक्षिण- अफ़्रिका-देशस्य राष्ट्रपतिना रामफोसा इत्यनेन सह द्विपाक्षिकं मेलनं कृतवान्।
- विदेशमन्त्री डा. एस्. जयशङ्करः युक्रेन् देशस्य विदेशमन्त्रिणा आन्द्रेई सिबिहा इत्यनेन सह दूरभाष-माध्यमेन वार्तालापम् अकरोत्। सममेव सः संघर्षं शीघ्रमेव समापनाय, चिरस्थायी शान्त्यै च भारतस्य समर्थनं प्रख्यापितवान् ।
- केन्द्रीय-वाणिज्य-उद्योग-मन्त्री पियूष-गोयल: न्यगदयत् यत्, भारत- इस्राइल -देशौ स्व प्रस्तावित-मुक्त-व्यापार-सन्धिं (एफ़. टी. ए.) द्वयोः चरणयोः प्रवर्तयितुं विचारयन्तौ स्तः ।
- भारत-ऋतु-विभागेन आगामिषु पञ्च-दिवसेषु पूर्वोत्तरभारते उत्तरप्रदेशे च न्युनात् मध्यमपर्यन्तं निहारस्य संभावना प्रकटितास्ति।
- बैडमिण्टन-क्रीडायां लक्ष्यसेनः सिड्नी-नगरे पंचविशत्यधिक द्विसहस्रतमवर्षस्य आस्ट्रेलियन्-ओपन्- पुरुष-एकल-उपाधिं अवाप्नोत्।

------------

**पी एम जी 20**

प्रधानमन्त्रिणा नरेन्द्रमोदिना महत्त्वपूर्णप्रौद्योगिकीनां प्रचारस्य मूलभूतपरिवर्तनस्य आवश्यकतायाः विषये अवधानं दत्तम्। जोहान्स्बर्ग्-नगरे आयोजिते जी- विंशतिः शिखरसम्मेलने " ए फेयर एंड जस्ट फ्यूचर फार

आल" इति विषयमाधृत्य तृतीयं सत्रं अभिसंबोधितवान्। प्रोक्तवान् च यत् तन्त्रज्ञानं वित्तकेन्द्रितं न तु मानवकेन्द्रितं भवेत्, राष्ट्रियं न तु वैश्विकं भवेत् इति। नवदेहली-जी- विंशतिः शिखरसम्मेलने प्रतिभायाः शीलतायाः विषये कृतप्रगतिं स्मरन्, प्रधानमन्त्री मोदी आगामिषु वर्षेषु प्रतिभायाः चलनशीलतायाः वैश्विकसंरचनायाः स्थापनार्थं समूहः कार्यं करोति इति प्रस्तावितवान्।

सः अवोचत् यत्, भारत-ब्रज़िल्-दक्षिण- अफ्रिका (आई. बी. एस्. ए.) न केवलं त्रिराष्ट्राणां समूहः अपितु त्रिमहाद्वीपानां त्रिप्रमुख-लोकतन्त्राणां, त्रिप्रमुख-अर्थव्यवस्थानां च सम्बद्धः महत्त्वपूर्णः मञ्चः अस्ति। सः अवदत् यत्, त्रयःदेशाः परस्परं विकासस्य पूरकः भवितुं शक्नुवन्ति तथा च सुस्थिरवृद्धेः उदाहरणं स्थापयितुं शक्नुवन्ति। जोहान्स्बर्ग्-नगरे आई. बी. एस्. ए. आयोजितायां सभायां भाषणं कुर्वन् प्रधानमन्त्री मोदी, तृणधान्येषु, प्राकृतिककृषौ, आपत्-स्थिति-स्थापकतायां, हरित-ऊर्जायां, पारम्परिक-चिकित्सायां, स्वास्थ्य-सुरक्षायां च सहयोगस्य अवसरान् प्रख्यापितवान् ।

षष्ठं भारत-ब्राज़िल्-दक्षिण- अफ्रिका सम्मेलनं (आई. बी. एस्. ए.) प्रधानमन्त्री नरेन्द्र मोदी, राष्ट्रपतिः रामफोसा, राष्ट्रपतिः लूला डी सिल्वा इत्येतेषां मध्ये समभवत्। अत्रान्तरे, प्रधानमन्त्री मोदी इदानीं सहनेतृभिः सह सम्मिलति सममेव जी-विंशति शिखरसम्मेलने समापनदिवसस्य काले "ए फेयर एण्ड् जस्ट फ्यूचर फ़ार आल क्रिटिकल मिनरल्स्, डिसेण्ट् वर्क्, एण्ड् आर्टिफिशियल् इन्टेलिजेन्स्" इति विषये भाषणं विदधाति। अद्य शिखरसम्मेलनानन्तरं, प्रधानमन्त्री जपान्-देशस्य प्रधानमन्त्री साने टाका, कनाडा-देशस्य प्रधानमन्त्री मार्क् कार्नी, इटली-देशस्य प्रधानमन्त्री जार्जिया मेलोनी इत्येतेषां सह अपि द्विपाक्षिकं मेलनं करिष्यति।

अत्रान्तरे, गतरात्रौ वार्ताहरैः सह वार्तां कुर्वन्, विदेशमन्त्रालयस्य सचिवः सुधाकर-दलेला इत्येषः, यः जी-विंशति कार्याणि अपि निरीक्षति स्म, सः अवोचत् यत् जी-विंशति इत्यनेन दक्षिण- अफ्रिका देशस्य अध्यक्षेण चिह्नितानां चतुर्णां प्रमुखप्राथमिकतानां विषये दृढः सन्देशः दत्तः अस्ति इति।

**<u>उपराष्ट्रपतिः सी. पी. राधाकृष्णन</u>**

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः अद्य आन्ध्रप्रदेशस्य पुट्टपर्थि-नगरस्य एस्. एस्. एस्. हिल् व्यू क्रीडाङ्गणे श्री सत्यसाईं बाबा वर्यस्य शतवार्षिक-उत्सवेषु भागम् अभजत्। अस्मिन् अवसरे उप-राष्ट्रपतिना श्री सत्यसाईं बाबा शान्तेः, प्रेमस्य, निस्वार्थसेवायाः च वैश्विक-प्रतीकरूपेण प्रशंसितम्। सः अवोचत् यत् बाबा वर्यस्य सन्देशाः "सर्वेभ्यः प्रेमं कुर्वन्तु, सेवां कुर्वन्तु" तथा "सर्वदा सहयोगं कुर्वन्तु, कदापि मा पीडयन्तु" इत्येतत् भावं च सम्पूर्णे विश्वे जनान् निरन्तरं प्रेरयन्ति।

**<u>विराम</u>**

**संस्कृतवार्तायाः संस्करणमिदम इदानीम आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले <u>www.newsonair.gov.in</u> इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

**<u>जयशङ्करः युक्रेन</u>**

विदेशमन्त्री डा. एस्. जयशङ्करः युक्रेन् देशस्य विदेशमन्त्रिणा आन्द्रेई सिबिहा इत्यनेन सह दूरभाष-माध्यमेन वार्तालापम् अकरोत्। सामाजिक-आन्तरजालीये सन्देशे डा. जयशङ्करः, रशिया-यूक्रेन्-विवादसम्बद्धानां वर्तमानविकासेषु तस्य प्रस्तुतविवरणाय प्रशंसाम् अकरोत्। सः एनं संघर्षं शीघ्रमेव समापनाय , चिरस्थायी शान्त्यै च भारतस्य समर्थनं प्रख्यापितवान् ।

**<u>भारत - इस्राइल</u>**

केन्द्रीय-वाणिज्य-उद्योग -मन्त्री पियूष-गोयलः न्यगदयत् यत्, भारत- इस्राइल -देशौ स्व प्रस्तावित-मुक्त-व्यापार-सन्धिं (एफ़. टी. ए.) द्वयोः चरणयोः प्रवर्तयितुं विचारयन्तौ स्तः येन उभयदेशयोः व्यापार-समुदायस्य शीघ्रलाभः सुनिश्चितः भवेत्। सः अवदत् यत्, एफ़. टि. ए. इत्यस्य प्रथम-चरणं ते प्रकाशयितुं शक्नुवन्ति, येन ते शीघ्रं लाभान् आरप्स्यन्ति। श्री गोयलः अवदत् यत्, भारतं विश्वस्मिन् हि विश्वे विश्वसनीयसहभागीत्वेन उद्भूतम् अस्ति।

**<u>ऋतु-विभागेन</u>**

भारत-ऋतु-विभागेन आगामि पञ्च-दिवसेषु पूर्वोत्तरभारते उत्तरप्रदेशे च न्युनात् मध्यमपर्यन्तं निहारस्य संभावना प्रकटितास्ति। विभागेन आगामि-त्रिषु दिनेषु तमिल्नाडु, पुदुचेरी, करैकल्, केरल, माहे, लक्षद्वीप्, अण्डमान्-निकोबार्-द्वीपसमूहेषु प्रचण्डवृष्टेः पूर्वानुमानं प्रकटितम्। अद्य अण्डमान्-सागरे, दक्षिणपूर्वदिशि, नैर्ऋत्य-बङ्गाल-खात्याः अनेकेषु भागेषु च प्रचण्ड-वायोः स्थितेः ऋतुविभागेन पूर्वानुमितम्। अत्रान्तरे दिल्ली-एन्. सी. आर्. क्षेत्रे वायुगुणवत्ता अत्यन्तं निकृष्टतम-वर्गे एव अस्ति।

**<u>बैडमिण्टन</u>**

बैडमिण्टन-क्रीडायां भारतीयशीर्षक्रीडक: लक्ष्यसेनः सिड्नी-नगरे पंचविशत्यधिक द्विसहस्रतमवर्षस्य आस्ट्रेलियन्-ओपन्- पुरुष-एकल-उपाधिं प्राप्नोत्। अयं उपाधिः वर्षस्यास्य तस्य प्रथमोपाधि: वर्तते। लक्ष्यः अद्य अन्तिम श्रृंखलायां षड् विंशतिः श्रेण्यां जापान -देशस्य युशी तनाका इत्येनं एकविंशतिः - पंचदश, एकादश इत्यंकातरालेन पराजयत।

**।। इति वार्ताः ।।**